नामांकाः Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **22**

# S-71-Sanskrit (T.L.) (Sp. Supp.)

No. of Printed Pages – **12**

## माध्यमिक विशेष पूरक परीक्षा, 2017

## SECONDARY SPECIAL SUPPLEMENTARY EXAMINATION, 2017

## तृतीय भाषा – संस्कृतम्

समय : $3\frac{1}{4}$ (सपाद होरात्रयम्)

अधिकतमांकाः 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।



Downloaded from www.cclchapter.com

1. अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

रघुवीरसिंह: कश्चित् सैनिकः आसीत् । विवाहार्थं स: स्वगृहम् आगतवान् । विवाहात्पूर्वं समाचारपत्रेषु वार्ता आसीत् – 'कच्छप्रदेशे आक्रमणम्', कार्गिल्प्रदेशे अपि आक्रमणम् ! इति । वार्तां पठित्वा सः पेटिकायां वस्त्राणि संस्थाप्य मातापितृसमीपं गत्वा अवदत् – "अम्ब ! अस्माकं राष्ट्रस्य उपरि आक्रमणं जातम् । युद्धे विजयं प्राप्य एव विवाहं करिष्यामि इति ।" माता अपि आशीर्वादं कृतवती । इत्थं रघुवीरः मातापितरौ नमस्कृत्य युद्धार्थं प्रस्थितः ।

(क) एकपदेन उत्तरत –

(i) सैनिकः कः आसीत् ? ½

(ii) रघुवीरसिंहः किमर्थं स्वगृहम् आगतवान् ? ½

(ख) पूर्णवाक्येन उत्तरत –

समाचारपत्रेषु वार्तां पठित्वा रघुवीरः किं कृतवान् ? **1**

(ग) निर्देशानुसारम् उत्तरत –

(i) उपर्युक्त गद्यांशे 'पराजयं' इति पदस्य विलोमपदं लिखत । ½

(ii) "माता अपि आशीर्वादं कृतवती" अस्मिन् वाक्ये कर्ता कः ? ½

(iii) "युद्धार्थं प्रस्थितः" इत्यत्र क्रियापदं लिखत । ½

(iv) "सः स्वगृहम् आगतवान्" रेखाङ्कितसर्वनामपदे संज्ञापदं लिखत । ½

2. अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

"श्रीकृष्णस्य भक्तजनेषु अत्युत्तमा मीरा । मीरायाः उक्तयः हिन्दीभाषयाः साहित्ये चूडामणिः इव सन्ति । अस्याः जनन्याः नाम वीरकुमारी पिता च रत्नसिंहः राठौडः आसीत् । बाल्यकाले मीरया कश्चन विवाहोत्सवः दृष्टः । तत्रवरं दृष्ट्वा सा बाल्यसहजतया – "अम्ब ! मम पतिः कः ?" इति पुनः पुनः जननीं पृष्टवती । माता तां देवागारे स्थितां श्रीकृष्णस्य मूर्तिं दर्शयन्ती – "एषः श्रीकृष्णः एव तव पतिः" इति अवदत् । ततः आरभ्य सा कदाचित् मूर्तिम् अलङ्करोति, कृष्णमूर्त्या सह सम्भाषणं करोति, क्रीडति च । श्रीकृष्णभक्त्यां लीनायाः मीरायाः मतिः, बुद्धिः, शक्तिः, दृष्टिः, प्रीतिः च कृष्णमयी अभवत् । मीरायाः लौकिकः पतिः युद्धे वीरगतिं प्राप्तवान् । ततः प्रभृतिः सा मथुरा–ब्रज–वृन्दावनादीनि तीर्थक्षेत्राणि सन्दृश्य अन्ततः सा द्वारकां प्राप्तवती । तत्र अनेकभक्तानाम् उपस्थितौ एव सा द्वारकाधीशस्य मूर्त्याम् अन्तर्हिता अभवत् ।



Downloaded from www.cclchapter.com

(क) एकपदेन उत्तरत –

(i) मीरायाः पितुः नाम किम् आसीत् ? ½

(ii) माता कुत्र स्थितां श्रीकृष्णस्य मूर्तिं दर्शितवती ? ½

(iii) मीरा कस्य मूर्त्याम् अन्तर्हिता अभवत् ? ½

(iv) कदा मीरया विवाहोत्सवः दृष्टः ? ½

(ख) पूर्णवाक्येन उत्तरत –

(i) कानि तीर्थक्षेत्राणि सन्दृश्य मीरा द्वारकां प्राप्तवती ? **1**

(ii) "एषः श्रीकृष्णः एव तव पतिः ।" इति का उक्तवती ? **1**

(iii) मीरा श्रीकृष्णमूर्त्या सह किं करोति स्म ? **1**

(ग) अस्य अनुच्छेदस्य उपयुक्तं शीर्षकं लिखत । **1**

(घ) यथानिर्देशं प्रश्नान् उत्तरत –

(i) "भक्तजनेषु अत्युत्तमा मीरा" अत्र विशेषणपदं किम् ? ½

(ii) "सा कदाचिद् मूर्तिम् अलङ्करोति" अत्र क्रियापदं लिखत । ½

(iii) "मीरायाः उक्तयः साहित्ये चूडामणिः इव सन्ति ।" इत्यत्र कर्तृपदं लिखत । ½

(iv) "सांसारिकः" इतिपदस्य पर्यायपदं गद्यांशात् चित्वा लिखत । ½

3. भवान् मोहितः । भवतः राजकीय–आदर्श–उच्चमाध्यमिक–विद्यालये वार्षिकोत्सवः समायोजितः आसीत् । विषयेऽस्मिन् एकं पत्रं स्वमित्रं प्रति लिखत । **$8 \times ½ = 4$**

**अथवा**

भवती गौरी । मातरं प्रति अधोलिखितं पत्रं मञ्जूषापद–सहायतया लिखत – **$8 \times ½ = 4$**

| |
|---|
| सम्यक्, क्रीडाप्रतियोगिता, ग्रीष्मावकाशे, भवदीया मन्त्रिमहोदयः, कुशलं, विविधेभ्यः विद्यालयेभ्यः, क्रीडितवती |

राजापुरतः

17/03/2017



Downloaded from www.cclchapter.com

पूजनीयाः मातृचरणाः !

प्रणमामि । अत्र......तत्राऽस्तु । मम विद्यालये..... आसीत् । क्रीडाप्रतियोगितायां.....अनेकाः छात्राः आगतवत्यः । अहमपि एकां क्रीडां....... । मुख्यातिथिरूपेण ........आगतवान् । मम अध्ययनं........चलति । अहं ......... गृहम् आगमिष्यामि । पितरं प्रणमामि ।

........ पुत्री

गौरी

4. मञ्जूषातः उचितानि पदानि चित्वा शिक्षक-छात्रयोः सम्भाषणं लिखत । **8 × ½ = 4**

| छात्रः, महोदय ! स्वीकृत्य, कथम्, कुत्र, ग्रन्थपालकः, ग्रन्थान्, ग्रन्थालयं |
|---|

(i) राकेशः – नमोनमः .......... ।

(ii) शिक्षकः – नमोनमः राकेश ! ...... भवान् ?

(iii) राकेशः – सम्यग् अस्मि । भवान् ......... गच्छति ?

(iv) शिक्षकः – ......गच्छामि । तत्र कोऽपि अस्ति वा ?

(v) राकेशः – आम् तत्र ........ अस्ति ।

(vi) शिक्षकः – भवान् अपि ग्रन्थालयात् ग्रन्थान्....... पठति वा ?

(vii) राकेशः – आम् महापुरुषविषयकान् ........पठामि ।

(viii) शिक्षकः – शोभनम् । श्रेष्ठः .......... सर्वदा सद्ग्रन्थान् पठति एव ।



Downloaded from www.cclchapter.com

5. अधः चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया वाक्यानि रचयत । **8 × ½ = 4**



| |
|---|
| सरिता, पक्षिणः, उद्यानम्, पुष्पाणि, शीतलम्, मधुरम्, कलरवः, वृक्षाः |

**अथवा**

अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा लिखत – **8 × ½ = 4**

| |
|---|
| मृत्योः, स्वर्णहारं, महावृक्षे, अनुधावन्तः, उपायेन, शावकान्, दण्डप्रहारेण, कृष्णसर्पम् |

(i) एकस्मिन् वने ............ काकः पत्न्या सह निवसति स्म ।

(ii) तस्य कोटरे स्थितः कृष्णसर्पः तयोः ............. खादति स्म ।

(iii) काकः कृष्णसर्पस्य ............... उपायं चिन्तितवान् ।

(iv) एकस्मिन् दिने सः अन्तःपुरात् ............... स्वीकृत्य कोटरे पातितवान् ।

(v) राजभटाः ............... कोटरसमीपम् आगतवन्तः ।

(vi) तत्र ............. अवलोकितवन्तः ।

(vii) ते ............. तं कृष्णसर्पं मारितवन्तः ।

(viii) सत्यम् एव .............. हि सर्वं शक्यम् ।



Downloaded from www.cclchapter.com

6. पाठ्यपुस्तकात् द्वौ श्लोकौ लिखत, यौ अस्मिन् प्रश्नपत्रे न स्याताम् । **2 × 2 = 4**

7. अधोलिखितेषु पदेषु सन्धिविच्छेदम् अथवा सन्धिं कृत्वा सन्धेः नामानि लिखत –

(i) नै + एकः ½ + ½ = **1**

(ii) दिक् + गजः ½ + ½ = **1**

(iii) नमोनमः ½ + ½ = **1**

8. अधोलिखतवाक्येषु रेखांकितसमस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामानि लिखत –

(i) सरोवरे <u>नीलकमलं</u> विकसति । ½ + ½ = **1**

(ii) रामः <u>पितरौ</u> प्रणमति । ½ + ½ = **1**

(iii) सज्जनः <u>शक्तिम् अनतिक्रम्य</u> दानं ददाति । ½ + ½ = **1**

9. कोष्ठकेषु प्रदत्तैः शब्दैः प्रकृतिप्रत्ययानुसारं रिक्तस्थानानि पूरयत –

(i) ________ महावृक्षः फलच्छाया समन्वितः । सेव् + तव्यत् । **1**

(ii) न भोगभवने ________ । भू + अनीयर् **1**

(iii) रमन्ते तत्र ________ । देव + तल् **1**

(iv) ________ अस्मभ्यं दुग्धं ददाति । अज + टाप् **1**



Downloaded from www.cclchapter.com

10. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत –

| इतस्ततः, शनैः, ह्यः कुतः |
|---|

(i) रमेशः ________ नगरम् अगच्छत् । 1

(ii) वस्तूनि ______ मा क्षिप । 1

(iii) कच्छपः ________ गच्छति । 1

(iv) अलसस्य _______ विद्या । 1

11. अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखत –

(i) गोपालः इतिहासं पठति । 1

(ii) लेखकेन निबन्धः लिख्यते । 1

(iii) पुष्पैः विकस्यते । 1

(iv) बालकः हसति । 1

12. घटिकाचित्रस्य सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करणीयम् –




(i) अहं प्रतिदिनं प्रातः _________ उत्तिष्ठामि । 1

(ii) अहं _________ भ्रमणार्थं गच्छामि । 1

(iii) अहं ________ भोजनं करोमि । 1



Downloaded from www.cclchapter.com

13. (i) 'चत्वार:' इति संख्यापदस्य स्वरचितवाक्ये प्रयोगः करणीयः । **1**

(ii) 30 इति संख्यां संस्कृतभाषायां शब्दे लिखत । **1**

14. अधोलिखितं वाक्यद्वयं शुद्धं कृत्वा लिखत –

(i) त्वं कुत्र गच्छति ? ½

(ii) एषः बालिका नृत्यति । ½

15. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

विचित्रा दैवगतिः । तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः । तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः । चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशंकया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत । चौरः एव उच्चैः क्रोशितुमारभत – "चौरोऽयं चौरोऽयम्" इति । तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन् । यद्यपि ग्रामस्य आरक्षी एव चौरः आसीत् । तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत् ।

(क) एकपदेन उत्तरत –

(i) गृहाभ्यन्तरं कः प्रविष्टः ? ½

(ii) अतिथिं कुत्र प्राक्षिपत् ? ½

(ख) पूर्णवाक्येन उत्तरत –

प्रबुद्धोऽतिथिः किं कृतवान् ? **1**

(ग) "विचित्रा देवगतिः" इत्यत्र विशेषणपदं किम् ? **1**

(घ) "उच्चैः क्रोशितुम् आरभत" इत्यत्र क्रियापदं लिखत । **1**

(ङ) "सुप्ताः" इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत । **1**



Downloaded from www.cclchapter.com

16. अधोलिखितं पद्यं पठित्वा यथानिर्देशं प्रश्नान् उत्तरत –

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम् ।

वाष्पयानमाला संधावति वितरन्ती ध्वानम् ।।

यानानां पङ्क्त्यो ह्यनन्ताः कठिनं संसरणम् ।

शुचि – पर्यावरणम् ।।

(क) एकपदेन उत्तरत –

(i) शतशकटीयानं किं मुञ्चति ? ½

(ii) ध्वानं वितरन्ती का संधावति ? ½

(ख) पूर्णवाक्येन उत्तरत –

संसरणं किमर्थं कठिनं वर्तते ? 1

(ग) "वाष्पयानमाला संधावति" इत्यत्र क्रियापदं लिखत । 1

(घ) 'कज्जलमालिनं धूमं' इत्यत्र विशेष्यपदं किम् ? 1

(ङ) 'सरलं' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत । 1

17. अधोलिखितं नाट्यांश पठित्वा प्रश्नानाम् उत्तराणि लिखत –

"चाणक्यः – भो श्रेष्ठिन् ! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः ।

चन्दनदासः – आज्ञापयतु आर्यः, किं कियत् च अस्मज्जना – दिष्यते इति ।

चाणक्यः – भो श्रेष्ठिन् ! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम् । नन्दस्यैव अर्थसम्बन्धः प्रीतिमुत्पादयति । चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव ।

चन्दनदासः – (सहर्षम्) आर्य ! अनुगृहीतोऽस्मि ।

चाणक्यः – भो श्रेष्ठिन् ! स चापरिक्लेशः कथमाविर्भवति इति ननु भवता प्रष्टव्याः स्मः ।

चन्दनदासः – आज्ञापयतु आर्यः ।

चाणक्यः – राजनि अविरुद्धवृत्तिर्भव ।



Downloaded from www.cclchapter.com

(क) एकपदेन उत्तरत –

(i) प्रीताभ्यः प्रकृतिभ्यः के प्रतिप्रियमिच्छत्ति ? ½

(ii) "राजनि अविरुद्धवृत्तिर्भव ।" इति कः उक्तवान् ? ½

(ख) पूर्णवाक्येन उत्तरत –

अर्थसम्बन्धः कस्य प्रीतिमुत्पादयति ? 1

(ग) "अनुगृहीतोऽस्मि" इत्यत्र क्रियापदं किम् ? 1

(घ) "दुःखाभावः" इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत । 1

(ङ) "चन्द्रगुप्तराज्यमिदम्" इत्यत्र सर्वनामपदं लिखत । 1

18. "अयोग्यः पुरुषः नास्ति, योजकस्तत्र दुर्लभः ।" इति सूक्तेः भावार्थं संस्कृतभाषायां लिखत । 2

19. व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम् ।

विदग्धमविदग्धं वा निर्दोषं परिपच्यते ।।

उपर्युक्तश्लोकस्य अन्वयम् आश्रित्य रिक्तस्थानानि पूरयत –

(i) नित्यं ________ कुर्वतो । ½

(ii) भोजनं ________ अपि । ½

(iii) विदग्धम् ________ वा । ½

(iv) निर्दोषं ________ । ½



Downloaded from www.cclchapter.com

20. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत –

(i) राजा तं मुनिं प्रश्नत्रयमपृच्छत् । 1

(ii) जनाः अकालकालकवलिताः भवन्ति । 1

(iii) शक्तिकुमारस्य हस्तात् प्रस्थमात्रं धान्यं स्वीकृतवती । 1

21. अधोलिखितानि वाक्यानि क्रमरहितानि । यथाक्रमं संयोजनं कृत्वा लिखत – **6 × ½ = 3**

(i) कूपे स्वप्रतिबिम्बम् अन्यः सिंहः इतिमत्वा आक्रमणं कृतवान् ।

(ii) कस्मिंश्चिद् अरण्ये एकः सिंहः क्रमशः समीपम् आगतं मृगं खादतिस्म ।

(iii) कुपितः सिंहः तेन सह कूपसमीपं गतवान् ।

(iv) कूपमध्ये पतितः सः जले निमग्नः मृतः च ।

(v) शशकः सिंहम् अवदत् यत् अन्य सिंहः मां बाधितवान् ।

(vi) एकस्मिन् दिने शशकस्य क्रमः आगतः ।



Downloaded from www.cclchapter.com

22. 'क' स्तम्भे पदानि दत्तानि । 'ख' स्तम्भे क्रमरहिताः तेषां समानार्थकशब्दाः दत्ताः । उचितं मेलनं कृत्वा लिखत –

**6 × ½ = 3**

| | (क) | | (ख) |
|---|---|---|---|
| (i) | पशुपतिः | – | चन्द्रः |
| (ii) | हिमकरः | – | नगरम् |
| (iii) | पत्तनम् | – | शिवः |
| (iv) | कृशानुः | – | अग्रे |
| (v) | पुरतः | – | मेघाः |
| (vi) | अम्भोदाः | – | पावकः |



Downloaded from www.cclchapter.com